Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 4 | ISSN : 2581- 6306

# रसमयः चमत्कारः अभिनवगुप्तभम्मटयोः मतं रसङ्गधरे निरुपितम्

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य, (पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**Article Info**
Volume 5, Issue 4
Page Number : 115-125
**Publication Issue :**
July-August 2022
**Article History**
Accepted : 01 July 2022
Published : 20 July 2022

**शोधसारः-** अस्मिन् पत्रे चमत्कारः कथं काव्यस्यात्मा भवतीति उक्त्वा रसगङ्गाधरकारेण उक्तानि मतानि एकादश सन्ति । एतानि मतानि एकादशरुद्रवत् एकादशमतानि रसगङ्गाधरकारेण सम्यक् रूपेण प्रतिपादितानि । रसगङ्गाधरकारः अन्याचार्याणामिव काव्यस्य भेदत्रयं न किन्तु काव्यस्य भेदचतुष्टयं अस्वीकरोत् । ते भेदाः मया अत्र प्रस्तुताः यथा उत्तमोत्तममुत्तममध्यमाधमारूपेण । न केवलं लक्षणं अपि तु तेषां लक्षणानामुदाहरणानि च मया लिखितानि ।

**कूटशब्दाः-** चमत्कारः काव्यात्मा , अभिनवगुप्तमतम्, भट्टनायकमतम् , श्रीशङ्कुकमतम्, नव्यमतम्, श्वोताश्वतरोपनिषद् ।

**रसमयः चमत्कारः**-जगन्नाथपण्डितराजः आदौ काव्यानां लक्षणमुक्त्वा तदनन्तरं एकादशरुद्रवत् एकादशरसानां मतानि पर्यालोचयत् अस्मिन् रसगङ्गाधराख्ये ग्रन्थे । तत्रादौ उत्तमोत्तमकाव्यस्य लक्षणमेवं वदति -1 " शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्ङ्क्तः तदाद्यम्" । कमपीति पदेन चमत्कृति-विषये एव उक्तवान् रसगङ्गाधरकारः। यत्र यस्मिन् काव्ये चमत्कारातिशयः वर्तते तं काव्यम् उत्तमोत्तमकाव्यमिति कथयति कविः । यदि गुणीभावितात्मानाविति पदं लक्षणे न निवेशयति चेत्तर्हि वाच्यसिद्ध्यङ्गव्यङ्ग्यस्यापि चमत्कारितया तत्र अस्य लक्षणस्य अतिव्याप्तिः भवति। तदर्थमेव लक्षणे गुणीभावितात्मानाविति पदस्य निवेषणं कृतम् ।

**उत्तमोत्तमकाव्यस्योदाहरणम्-**

**श्लोकः**

**शयितासविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् ।**
**दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्ष्यते ॥**

अत्रालम्बनं नायकः, उद्दीपनन्तु रहःस्थानादयः, अनुभावः निरीक्षणादिः, व्यभिचारिणः त्रपौत्सुक्यादयः एतेषां संयोगात् चमत्कारस्य च प्राधान्यात् रतिरभिव्यज्यते ।

**अन्यदुदाहरणम्-**

**गुरुमध्यगता मया नताङ्गी निहता**
**नीरजकोरकेण मन्दम् ।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**दरकुण्डलताण्डवं नतभ्रूलतिकं**

**मामवलोक्य घूर्णिताऽऽसीत् ॥**

श्वश्रूप्रभृतीनां तन्निकटस्थानोपविष्टा सन्नतावयवा सा मया कमलमुकुलेन शनैर्निभृतमिति यावत् नितरां ताडिता दरमीषत् कुण्डलस्य ताण्डवं नटनं, यत्र तद् यथा स्यात् तथा श्वश्वादिसान्निध्यात् मयि साभ्यसूयं मां अवलोक्य भ्रान्तासीदित्यर्थः ।

अत्र दुर्विदग्ध । किमिदं रहसि विधेयं गुरुजननिकटेऽपि विहितवानसि इति वस्तुव्यञ्जन-पुरस्सरं नायकविषयकोऽमर्षः व्यभिचारिभावो वाच्यवाचकापेक्षयाऽधिक- चमत्कारितया प्राधान्येन व्यज्यत इत्युत्तमकाव्यस्येदमुदाहरणम् ।

अन्यदुदाहरणम्-

**तल्पगताऽपि च सुतनुः**

**श्वासासङ्गं न या सहे ।**

**सम्प्रति सा हृदयगतं**

**प्रियपाणिं मन्दमाक्षिपति ॥**

या नवोढावधूः सुन्दरी नितरां कोमलाङ्गी अत एव केलिनिलयस्थशय्यायां कथञ्चन सहचरीसहस्रानुरोधेन शयिताऽपि पत्युर्निश्वासस्य आसङ्गमीषत्सम्पर्कम् नैव ममर्ष सा सम्प्रति प्रियविदेशयात्रापूर्वरात्राविदानीं हृदयगतं सशङ्केन प्रियेण हृदये वक्षसि निहितं प्रियस्य करम्, भाविविरहाशङ्केन शनैराक्षिपति अपसारयतीत्यर्थः ।

अत्र तु सम्प्रति इति शब्देन पूर्वापरसन्दर्भसम्बद्धेन तस्या नववधूभावे पूर्वमन्यादृशः सङ्कोच आसीत्, सम्प्रति तु क्रमेण न्यूनताऽन्यादृश एवाभूत् इत्याद्यर्थस्य विलम्बेन प्रत्यायनाद् प्रतीतेः विलम्बितया संलक्ष्यक्रमव्यङ्ग्यत्वमत्र प्रतिपादितम् । एतादृशश्लोकेषु चमत्कारप्राधान्यात् रतिरभिव्यज्यते।

2. **यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद् द्वितीयम् ।** लीनव्यङ्ग्यादिषु अतिव्याप्तिवारणाय चमत्कारेति पदम् स्थापितमस्ति । लीन- व्यङ्ग्यं नाम अस्फुटव्यङ्ग्यमित्यर्थः । अयं तु काव्यतृतीभेदस्य प्रभेदः । चित्राख्यं चतुर्थमधमकाव्यम् । तत्र व्यङ्ग्यमप्राधान्यं वहति । अतः द्वितीयलक्षणस्यातिव्याप्तिः भवति अतः चमत्कारकारणमिति पदं निवेशितम् । एतयोः काव्ययोः व्यङ्ग्यस्य चमत्कारत्वविरहात् अतिव्याप्तिर्न भवति ।

उत्तमकाव्यस्योदाहरणन्तु-

**राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु ।**

**शिशिरे सुखं शयाना कपयः कुप्यन्ति पवनतनयाय ॥**

श्रीरामस्य वैदेहीवियोगः तस्य वह्नेरिवान्तर्बहिर्दाहकत्वाद् कीलस्ताप तया ऊष्ममयीकृतेषु सह्यस्य शैलस्य शृङ्गेषु शीतत वस्त्राद्यभावेऽपि अशीतक्लेशं यथा स्यात्तथा स्वपन्तः कपयः सुग्रीवस्य वानराः हनुमते पुनश्शीतबाधां सम्भावयन्तस्तमुद्दिश्य क्रुध्यन्तीत्यर्थः ।

इह तु रघुनाथसुग्रीवयोरतिवल्लभं कपीनामपि सर्वदा हितकरं प्रति तेषामाकस्मिको वाच्यभूतः कोपोऽन्यथानुपपन्न इति तदुपपादककाङ्क्षायामनायत्या जानकीकुशलसूचन- विहितराम-विरहसन्तापापनोदनात्मा व्यङ्ग्यार्थ एव पुरः परिस्फुरनङ्गतां भजन्नपि, यथा दौर्भाग्येण दासी - भावमापन्नाऽपि राजमहिषी काञ्चन विलक्षणां नैसर्गिकीं सुषमामावहति, तथैव कञ्चिद् विलक्षणं चमत्कारं करोतीति व्यङ्ग्यस्य गुणीभावेऽपि चमत्कारितोत्कर्षेण द्वितीयकाव्यस्योदाहरणमिदम् । अस्मिन् श्लोके जानक्याः

कुशलवार्ताश्रवणेन विहित रामस्य विरहापनोदनात्मा व्यङ्ग्यार्थः अङ्गतां प्राप्नुवन्नपि दौर्भाग्येण दासीभावमापन्नाऽपि राजमहिषीं काञ्चन विलक्षणां नैसर्गिकीं सुषमां प्राप्नोति ।

**3. यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम्-** यस्मिन् काव्ये व्यङ्ग्यप्रतीतिजन्यश्चमत्कारो लेशतः प्रादुर्भवन्नपि वाच्य- प्रतीतिजन्यचमत्कारस्य सर्वतोमुखीनस्यान्तर्निगीर्णः स्पष्टतयाऽनुभवगोचरतां नाचामति, तत् काव्यं तृतीयं काव्यम् भवति । अत्रोत्प्रेक्षालङ्कारः चमत्कारं जनयति- 1 इह व्यङ्ग्यचमत्कारस्य सर्वथाऽसद्भावस्तु नाभिधेयः, तथा सति वाच्य- चमत्कारस्याप्यसम्भव इत्यनुपदमेव स्फुटीकरिष्यति ग्रन्थकृत् । तनयमैनाकः तस्य , अन्वेषणाय आयतीकृता समुद्रस्य उदरे प्रविष्टा हिमाचलस्य बाहुरिवाचरति तस्याः परमेश्वर्याः भागीरथ्याः गङ्गायाः सहचरी यमुनेत्यर्थः ।

अत्र उत्प्रेक्षा वाच्यैव चमत्कारस्य कारणम् । गङ्गायाः स्वच्छता पाताल- पर्यन्तानुधावन - प्रभृति व्यंङ्ग्यं तु पश्चात् प्रतीतिपदवीमवतरदपि तावन्तेव चमत्कारं कर्तुं प्रभवति, यावान् वाच्य - चमत्कारकुक्षावेव निक्षिप्तो भवति, न तु अधिकं पृथक् प्रतीयत । यथा स्वभावगौराङ्ग्या अनभिज्ञनायिकया कल्पितस्य काश्मीर- द्रवेणाङ्गरागस्य प्रभया तस्या अङ्गानां गौरता तिरोधीयते । ततश्चात्र व्यंङ्ग्यचमत्कारस्य वाच्यचमत्कारे निलीनताऽस्फुटत्वाद् व्यंङ्ग्यचमत्कारासमानाधिकरण्यं वाच्य- चमत्कारस्येति तृतीयप्रकारत्वमिदमिति आशयः।

**4) यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम् ।**

**मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।**

**गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमोनमः ॥**

इह श्लोके वृत्त्यनुप्रासालङ्कारः चमत्कारम् आदधाति । अत्र भगवद्विषयकवक्तृ- निष्ठ-रति-भावादि व्यङ्ग्यप्रतीतिजन्मा लेशतस्सन्नपि अस्फुटत्वात् चमत्कारो लीनोऽपि अङ्गतामेव भजति । यत्र शब्दार्थयोः ऐकाधिकरण्यं तयोः गुणप्रधानभावं पर्यालोच्य यथालक्षणं व्यवहर्तव्यमिति जगन्नाथपण्डितवर्यैर्कथितम् ।

श्लोक :-

**उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पन्धयानां**

**निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम् ।**

**उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः**

**सङ्घातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ॥**

'अत्र वृत्यनुप्रासालङ्कारः, ओजोगुणवाचकत्वाच्च रूपकालङ्कारस्य हेत्वलङ्कारस्य वाच्यस्य, अनयोः चमत्कृत्योः तुल्यस्कन्धत्वात् समम् प्राधान्यम् । एवं रसगङ्गधरकारस्य काव्यभेदचतुष्टयं अत्र वर्णितं मया अन्येषु काव्यग्रन्थेषु विद्यमानाः काव्यभेदाः ग्रन्थगौरवभयाद् अत्र नोक्ताः । कविभिः इतरग्रन्थेभ्यः काव्यलक्षणानि दृष्ट्वा तत्रस्थ चमत्कारोदाहरणानि स्वयं परिशीलयन्त्विति प्रार्थये ।

**अभिनवगुप्त मतम्।**

तत्र आदौ अभिनवगुप्तमम्मटयोः मतं रसगङ्गाधरे निरूपितम् अस्ति । समुचित इत्यारम्भं कृत्वा-अस्यायमभिप्रायः मनुष्यः स्वजीवने बहूनां भावानामनुभवं करोति । स कदाऽपि स्वप्रेम प्रकटयति कदापि क्रोधं, घृणां, उत्साहं, हासं आश्चर्यं च प्रकटयति,

एवमेव शान्तेः अनुभवोऽपि भवति । अस्य अनुभवस्य नष्टोऽपि स्यात्, किन्तु मनुष्यस्य हृदये तु वासनारूपेण इमे भावा भवन्ति। वासनारूपेण ये भावास्सन्ति त एव भावास्साहित्यशास्त्रे रतिः, शोकः क्रोधः, जुगुप्सा, भीत्यादि नामभिराह्वयन्ते ।

एत एव चित्तवृत्तय इति नाम्नाऽपि व्यवह्रियन्ते । एते भावाः "सत्यं विज्ञानमनन्तं ब्रह्म" इत्यादि वेदवाक्यानुसारं सत्ययुक्ता एवं विज्ञायमयास्सन्ति । अतः ते स्वयं प्रकाशमाना आत्मानन्देन सहानुभूता भवन्ति । तदानीं त एव भावाः रससंज्ञां भजन्ते । अस्याम् अवस्थायां रसोऽहम् इति प्रतीतिर्भवति । किन्त्वेतेषां भावानाम् आत्मानन्देन साकम् अनुभवः तदैव भवति यदा आत्मनः आवरणभङ्गो भवति । आवरणभङ्गः तदा भवति यदा अलौकिकः भावकत्वव्यापारः भवति । अनुभवकर्तरि यदाऽज्ञानं वर्तते तत् केवलम् अल्पज्ञपदार्थानां ज्ञानार्थमेव भवति, संसारस्य सकलपदार्थानां ज्ञानं तु न भवति । यदा आत्मनः अज्ञानावरणं गच्छति तदानीं स्वयमात्मा प्रकाशते, इतरपदार्थानां ज्ञानं च प्रदास्यति । यदा सर्वेषां पदार्थानां ज्ञानं भवति तदा अनुभवकर्तुः स्वात्मानन्देन (चमत्कारेण) सह रत्यादि स्थायिभावनायाः अनुभवोऽपि भवति ।

भावकत्वव्यापारः- भावकत्वव्यापारस्य सृष्टिः विभावानुभावव्यभिचारिभावानां मेलनेन भवति । अधुना के विभावाः, के अनुभावाः, के व्यभिचारिभावा इत्यपि ज्ञास्यामः। आलम्बनोद्दीपनेति विभावद्वयं शरीरे विद्यमानाः विकाराः अनुभावाः, एवं त्रयस्त्रिंशत् व्यभिचारिभावा अपि सन्ति । व्यभिचारिभावानां विषये भावध्वनिप्रसङ्गे वक्ष्यामि ।

**विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।**
**रसतामेति रत्यादिः स्थायीभावः सचेतसाम् ।**
**सत्त्वेद्रेकादकण्ड स्वप्रकाशानन्दचिन्मयः ।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥**
**लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः ।**
**स्वाकरवदभिन्नत्वेनायमास्वाद्यते रसः ।**
**पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम् ।**
**सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।**
**निर्वासनान्तु रङ्गान्त काष्ठकुड्याश्मसन्निभाः ॥**

मम्मटेनापि स्वकीये काव्यप्रकाशे एतदेव स्पष्टीकृतम्- "व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः "। व्यक्तिपदस्य अयमर्थः व्यक्तिर्नाम भग्नावरणाचिदिति । अर्थात् व्यक्ति इति पदेन आज्ञानरूपावरणेन मुक्तात्मैव स्फुटीभवति । रत्यादि स्थायिभावानां प्रकाशक : आत्मा भवति । सर्वं ज्ञाततयाऽज्ञाततया वा साक्षिभास्यम् । इति पद्मपादाचार्यैः पञ्चपादिका नामके ग्रन्थे कथितमस्ति । साक्षीचेता केवलो निर्गुणश्च श्रुतिः -श्वेताश्वतरोपनिषद्'।

ग्रन्थकारेण इत्थम् उक्तम्, विभावादीनामपि स्वप्नतुरगादीनामिव रङ्गरजता- दीनामिव, साक्षिभास्यत्वं रोद्धुम् न शक्यते । विभावादयः वासनारूपेण तिष्ठन्तिकिन्त्वात्मनः पुनरावरणं भवति अतः रत्यादीनां प्रकाशनं न भवति । प्रथमपक्षे अज्ञानस्य आवरणं कर्तुं भावकत्वव्यापारस्य आवश्यकता अस्ति । अधुना पक्षान्तरं प्रतिपादयति । अज्ञानरूपावरणस्य कल्पनाय नवीनव्यपारस्य कल्पना अनावश्यकी ।

सहृदयतावशेन परिपक्व भूतकाव्यार्थविषयकी भावना सहृदयानाम् आत्मनि स्थिता – ज्ञानस्यावरणं दूरीकरोति । विभावादीनां साधारणीकरणं करोति । वर्णानां नित्यत्वं वैय्याकरणानां मीमांसकानां च अभिमतम् । गकारादौ उत्पत्तिविनाशौ आचर्यते संबन्धः। यदि रसः आत्म–चैतन्यस्वरूपः इति स्वीकुर्मः तर्हि रसो उत्पन्नः, रसः विनष्टः इत्यादि व्यवहारः असङ्गतो भवति । यतो हि आत्मचैतन्यं नित्यम्, अतः तत्स्वरूपो नित्यः, अस्याः शङ्कायाः समाधानं वदति । यथा वैय्याकरणानां मते वर्णाः नित्याः इति स्वीकारेऽपि कण्ठताल्वादिस्थानेषु विद्यमानोत्पत्तिविनाशरूपं आरोपं वर्णेषु कृत्वा उत्पन्नः गकारः विनष्टः गकारः इत्यपि व्यवहारः भवति । एवमेव रसः नित्यः इति अङ्गीकुर्मः किन्तु व्यञ्जकविभावादिचर्वणा अथवा आवरणभङ्गे स्थितोत्पत्तिः एवं विनाशः रसे आरोप्यते । अत एव उत्पन्नो रसः विनष्टो रस इति व्यवहारो भवति ।

विभावादीनां चर्वणायाः अविद्यमानत्वात् निवृत्तायां तस्यां प्रकाशस्य पुनः अज्ञानावृत्तेः कारणात् स्थायी विद्यमानोऽपि न प्रकाशते । रसः इत्युक्ते निर्विकल्पकसमाधौ योगिनां ब्रह्मानन्दः लप्स्यते, तथैव साहित्यशास्त्रे स्थायिभावैः युक्तानन्दाकारचित्तवृत्तेः रस इति नाम स्थापितवन्तः । अनेन अभिनवगुप्तमम्मटादिग्रन्थस्वारस्येन भग्नावरणा– चिद्विशिष्टा रत्यादि स्थायीभावो रस इति स्थितम् । चर्वणा तु चैतन्ये अज्ञानरूपावरणस्य नाश एव रसस्य चर्वणा इति नाम्ना उच्यते । अन्तःकरणस्य आनन्दाकारवृत्तेः रसचर्वणेति नाम स्थापयितुं शक्यते ।

सविकल्पकसमाधिकाले ब्रह्मानन्दास्वादो भवति, अनेनेयं रसचर्वणा विलक्षणा अस्ति। यतो हि रसचर्वणायाः आलम्बनं तु विभावादिविषयैर्मिश्रित आत्मानन्दोऽस्ति, एवं काव्यस्य व्यञ्जनाव्यापारेण एव चर्वणा भवति, ब्रह्मानन्दस्यालम्बनं तु विषयविहीनशुद्धात्मानन्दोऽस्ति एवं श्रवणमनननिदिध्यासनरूपव्यापारेण स भवति । अतः ब्रह्मास्वादस्य एवं रसास्वादस्यापि कारणं विषयश्च उभावपि भिन्नावत उभयोर्मध्ये भोदोऽस्तीति ज्ञातव्यम्।

यथा समाधौ सुखस्य भानं भवति, तथैव रसास्वादेऽपि सुखस्य भानं भवति । यदि भवन्तः वदन्ति समाधौ सुखस्य भाने भगवद्गीता एव प्रमाणमिति यथा तत्रस्थ श्लोक : "सुखमात्यन्तिकं यत् तद्बुद्धिग्राह्यमतीन्द्रियम्" इति उदाहरणं प्रदास्यन्ति तर्हि रसे सुखस्य भानं भवतीति अस्माभिरपि उदाहरणं दीयते – यथा – " रसो वै सः, रसह्येवायं लब्ध्वानन्दी भवति । " इति वेदवाक्यं एवं सहृदयाः च प्रत्यक्षप्रमाणम्।

आनन्द एव चमत्कारस्य अपरपर्यायः । आनन्दाकारचित्तवृत्तिः रसचर्वणेति यदा आह्वयन्ति, ( सा चर्वणा) शब्दस्य व्यञ्जनाव्यापारेण उत्पन्ना अस्ति, अत सा शाब्दी अस्ति आत्मा – नन्दः तस्याः आलम्बनमस्ति । अतः अपरोक्षात्मिकी एवं प्रत्यक्षात्मिकी चास्ति । अस्य अयमर्थः यद्यपि शाब्दबोधस्य गणना परोक्षज्ञाने एव अन्यत्र कृताऽऽस्ति, तथापि रसचर्वणा शाब्द – बोधरूपा प्रत्यक्षात्मिकी चास्ति ।

एकस्मिन्नेव ज्ञाने शाब्दत्वं एवं प्रत्यक्षात्मकत्वमिति उभयोस्सत्त्वं दृष्टान्तेनैकेन प्रतिपादयति । शाब्दत्वं एवं प्रत्यक्षत्वमुभयोर्मध्ये भेदं नैय्यायिका प्रतिपादयन्ति । वेदान्तिनस्तु तत्त्वमसि इति वेदवाक्येन जीव एवं परब्रह्मणि च ऐक्यबुद्धिर्भवति इति कथयन्ति । अस्याः बुद्धेः शब्दजन्येति कारणेन शाब्दी इति ब्रह्मविषयकी अतः प्रत्यक्षरूपेणेत्यपि वदन्ति । इति अभिनवगुप्तानां मतम् ।

**भट्टनायकमतम्-**

'हृदयदर्पणग्रन्थरचयिता भट्टनायकः, तषां मतं प्रतिपादयितुम् ईष्टे । ताटस्थ्येन इत्युक्ते दुष्यन्तशकुन्तलाविषयकरतिः सहृदये रसप्रतीतिर्भवतीति यदि वदन्ति चेत्, अत्र चमत्कार एव नास्तीति वदन्ति कवयः, यदा चमत्कार एव नास्ति तर्हि कथं स रसेति वदन्ति इति प्रश्नः, यतो हि रसे सारः चमत्कारः एतादृशस्सिद्धान्तः सर्वसम्मतः ।

यदि भवन्त एवं वदन्ति उदासीनभावेन शकुन्तलादि रतिप्रतीतिर्भवतीति यदि वदन्ति तत्र यदि चमत्कारो नास्ति तथाप्यस्माकं सम्मत एव यतो हि "सर्वं खल्वात्मनः कामाय प्रियं भवति" इति सिद्धान्तानुसारं अस्मासु प्रतीयमानरतौ चमत्कारोऽस्त्येव । यदि भवन्तः, अहं शकुन्तलाविषयकरत्या युक्त इति एतादृशी प्रतीतिः भवतामिष्टा, तर्हि आस्वादे बाधा एव न भवति इति तदानीमपि रसप्रतीतिर्न भवति । यतो हि शकुन्तला सामाजिकानां आलम्बनविभावः कदापि न भवति, अत उक्तप्रतीतिर्न भवत्येव ।

विभावेन विना एव रसप्रतीतिस्तु न भवत्येव । यतो हि आलम्बनरहितं रत्यादिज्ञानं कदापि न भवति । अर्थात् प्रेमभावं विना अन्यं मम प्रेयानिति कदापि कोऽपि न वदति। अनालम्बितरत्यादीनां प्रतीतिस्तु कदापि न भवति । शकुन्तला आलम्बनरूपेणास्तीति यदा वदामः शकुन्तला कदापि सामाजिकानां आलम्बनविभावो न भवति। रत्यादीनां कारणं केवलं तत्र कान्तात्वम् अतः शकुन्तला आलम्बनविभावो भवति इति यदि वदामस्तदानीमस्माकं मातृषु, स्वसृष्वपि कान्तात्वमस्तीति कृत्वा ता अपि अस्माकम् आलम्बनविभावा भवेयुः तन्न समीचीनम् ।

कस्यापि पुरुषस्य इदं ज्ञानं जातं यत् इयं नायिका मम अगम्येति । द्वितीये क्षणे इयं नायिका मम गम्येति च तर्हि किं भवतीति प्रश्नः उदेति तस्येदं समाधानं भवितुमर्हति । सा नायिका तस्य आलम्बनविभावो भवति वा न वा ? इति प्रश्न : उदेति। यदि भवन्तः वदेयुः, विशेष्यता - सम्बन्धावच्छिन्नप्रतियोगिताक अगम्यत्व- प्रकारकज्ञानं तु नास्ति अर्थात् इयं मम अगम्येति ज्ञानं अस्याः नायिकायाः उपरि विशेष्यतासंबन्धेन अस्ति, तर्हि सा तत्पुरुषीय आलम्बनविभाव एव न भवति । अस्तु अत ग्रन्थकारेण अगम्यत्वप्रकारकज्ञाने अप्रामाण्यनिश्चयानालिङ्गितविशेषणं लक्षणे स्थापितमस्ति । अर्थात् अस्यां नायिकायां शुद्धागम्यत्वप्रकारकज्ञानाभावः नास्तीति कृत्वा अप्रामाण्यनिश्चयानालिङ्गितविशिष्टोक्त एव अस्ति किन्तु अप्रामाण्यनिश्चयाना-लिङ्गितत्वविशिष्टस्य ज्ञानस्याभावस्तु अस्त्येव । ईदृशम् अभावं विशेषणाभावप्रयुक्त- विशिष्टाभाव इति वदन्ति । अतः ईदृशी नायिका ( सामाजिकस्य) विभावो भवत्येव । अधुना वदति शकुन्तला सामाजिकानां रतेः आलम्बनविभावो भवति वा न वा? शकुन्तला तु पूज्या सा न भवति ।

कान्तामात्रं रतेर्विभाव इत्याद्यङ्गीकुर्वन्ति तर्हि स्वस्त्रादिष्वपि कान्तात्वमस्तीति कृत्वा उक्त लक्षणोक्त नायिकौ एव रतेरालम्बनविभावेति स्वीकुर्मः ।

केवलं शृङ्गाररस एव न इतररसादिष्वपि एवमेव चिन्तनीयम् । यथा शृङ्गाररसे आलम्बनविभावच्छेदकः केवलं कान्तात्वम् इति न विचिन्त्य उक्तविशिष्टकान्तात्वं स्वीकृतम्, तथैव करुणरसेऽपि विभावतावच्छेदकः केवलं मृतजने न स्वीकरणीयं, अप्रामाण्यनिश्चयानालिङ्गिताशोच्यत्वं वा कापुरुषत्वप्रकारकज्ञानाभावविशिष्टमृतजनत्वं स्वीकरणीयम् ।

शोकस्य आलम्बनविभावः केवलं मृतपुरुषो न अन्यथा सोऽपि शोकस्यालम्बनं भवति, यः ब्रह्मज्ञानं प्राप्य मरणं प्राप्नोत् यस्य जीवन्मरणे काऽपि विशेषता नास्ति । अथवा यस्य पुरुषस्य मरणेन आनन्द एव भवति, स एव शोकस्य आलम्बनं भवति यस्मिन् स अशोच्य आसीत्, वा कापुरुषः ईदृशं ज्ञानं भवति । सामाजिकानां शकुन्तलादिविषयेषु अगम्यत्व प्रकारकज्ञानम् अवश्यं भवत्येव ।

यदि भवन्तः वदेयुः शकुन्तलाविषये अगम्यत्वप्रकारकज्ञानं रोद्धुं कोऽपि प्रतिबन्धको न दृश्यते इति वयं नाङ्गीकुर्मः, अयं भवतां दृष्टिदोष एव । अहं प्रतिबन्धकं प्रदर्शयिष्यामि, अभिज्ञानशाकुन्तलाख्ये अभिनये दृष्टे सति तत्र प्रत्येकं सामाजिक : आत्मानं दुष्यन्त इति चिन्तयति अर्थात् अहं दुष्यन्तेति ज्ञानं शकुन्तलाद्यगम्यत्वज्ञानस्य प्रतिबन्धकमस्ति । यतो हि दुष्यन्तः धराधीशः, धौरेयः च आसीत् किन्तु वयं आधुनिकतुच्छमानवाः एतादृशविरुद्धरसधर्मस्य यदा प्रतीतिः भवति, तदाऽहं दुष्यन्तेत्यात्मकस्य अभेदात्मकज्ञानस्य असम्भव एव । यदि केनाऽपि कारणेन उक्त विरुद्धज्ञानस्य प्रतीतिर्न भवति ।

यं रसं इति भवन्त आह्वयन्ति किं स: सामाजिकानां आत्मनि तस्य प्रतीतिर्भवति ? रसस्य स्वरूपं किम् ? शब्दजन्य: एवम् अभिधादिवृत्तिजन्य: अत: स: प्रत्यक्षरूपो न, व्याप्तिज्ञानावश्यकमस्ति अत: अनुमितिजन्य: इत्यपि न वदेम । सादृश्यमूलकोऽपि नास्ति अत: उपमिति – जनकोऽपि न । प्रत्याक्षातिरिक्तज्ञानं सर्वेऽपि अचमत्कारिज्ञानं इति कथयन्ति । शाब्दबोधोऽपि प्रत्यक्षज्ञानमेव । अत: अचमत्कारिज्ञानम् अचमत्कारी रस: कदाऽपि न भवति, रसे सार: चमत्कार: इति सिद्धान्त: । अन्यथा काव्यभिन्नशब्दैर्ज्ञाता:, स्त्रीपुरुषवृत्तान्तास्तेषां ज्ञानमपि रससंज्ञां भजति ।

सुरभिचन्दनमित्यादौ ज्ञानलक्षणालौकिकसन्निकर्षेण सौरभादीनां स्मरणमिव भान – मेव भवति, न तु तत्कृत: कश्चन चमत्कार: । इह तु चमत्कार इति उभयोर्कार्यभेदाद्भेदस्य अनुभवसिद्धत्वात् न ऐकात्म्यम् । एवं प्रकारेण पण्डितराज: विकल्पानां खण्डनं कृत्वा भट्टनायकाभिमतं रसस्वरूपम् उपपादयति–

श्रव्यकाव्ये अभिधाव्यापारेण दृश्यकाव्ये चक्षुरिन्द्रियेन आदौ शकुन्तलादि– पदार्थानां प्रतीति: भवति, अनन्तरं काव्ये विद्यमानभावकत्वव्यापारेण शकुन्तलादि– विषयेषु रसविरोधी इत्यात्मकं ज्ञानं स्थगितं, कान्तात्वादिरसोपयोगीधर्मेण शकुन्तलादि– पदार्थानामुपस्थिति: भविष्यति । भावकत्वव्यापार: शकुन्तला, दुष्यन्त:, देशकालवयो– संयोगवियोगादिदशात् साधारणं करोति ।

भावकत्वव्यापारेण उपरोक्तेषु पदार्थेषु कापि विशेषता नास्ति येन रसोद्बोधे बाधा अपि न भवति । ईदृशं कार्यं कृत्वा भावकत्वव्यापार: विरमति । तदनन्तरं भोगकृत्वभोजकत्वव्यापारद्वयं तमोगुणं दूरीकुर्वन्ति । एवं सत्त्वोद्रेक: अपि भवति । येन सामाजिक: सांसारिकसमस्तविषयान् त्यक्त्वा चैतन्यस्वरूपस्वात्मानन्दप्राप्त्यर्थं सिद्धो भवति, साक्षात्कारानन्दानुभवस्य विषय एव रत्यादिस्थायीभावा: रस इति नाम भजन्ते । सत्त्वोद्रेकेण साधारणीकरणव्यापारेण प्रकाशितं चैतन्यात्मकं ज्ञानं भोग इति नाम्ना आह्वयन्ति ।

अत्र मतद्वयेऽपि चैतन्ययुक्त: रस: एवं रसयुक्तचैतन्य: उभावपि रसावेव । सोऽयं भोग: विषयसंवलनाद् ब्रह्मास्वादसविधवर्तीत्युच्यते । एवं त्रयोंऽशा: काव्यस्य अभिधा भावना चैव तादृशभोगीकृतिरेव च । रस: ब्रह्मास्वादस्वरूप: न। रस: विभावादि विषयान् स्वापार्श्वे स्थापयति । किन्तु ब्रह्मास्वादो न । रसास्वाद: सविषयक: ब्रह्मानन्द: निर्विषयिक: उभयोर्मध्ये भेदोऽस्ति किन्तु, शब्दजन्यौ, सच्चिदानन्दमयौ, अपरोक्षसाक्षात्काररूपौ उभौ अत: समानविति कथयति भट्टनायक: ॥

**नव्यमतम्-**

**इदं मतं तु रसगङ्गाधरकारस्यैव मतमिति कवय: चिन्तयन्ति ।**

श्रव्यकाव्ये कवि: शब्दैर्विभावानुभावसञ्चारिभावान् प्रकाशयति दृश्यकाव्ये नट: अभिनयै: एतेषां प्रकाशनं करोति । सामाजिकानां श्रव्यकाव्यपठनेन नाटकस्य अवलोकनेन विभावादीनां ज्ञानं भवति, तदनन्तरं अस्माकं काव्ये व्यञ्जनाव्यापारेण विभावादीनां ज्ञानं भवति । दुष्यन्त: शकुन्तला – विषयकरतिमानिति ज्ञानानन्तरं सहृदयता एका भावना अस्मासु उद्भवति, अर्थात् वयं सहृदया अत अस्माकं अन्तरात्मा दुष्यन्ततत्वज्ञानेन युक्तो भवति । अनेन भावनारूपदोषेण वयम् अस्मानेव दुष्यन्त इति कल्पयेम, अनया भावनया उक्तदोषेण च कल्पितदुष्यन्तत्वेनाच्छादिता आत्मनि कल्पिता शकुन्तलाविषयकी रतिरपि भासते ।

शुक्तिकाशकले शुक्तिखण्डे वास्तविकरजतत्वाभाववत्यपि रजतत्वेन ज्ञायमाने इव तथैव शकुन्तलादिरतिरात्मनि जायते । उक्तभावनारूपदोषेणाहं दुष्यन्त: अनया भ्रमया सामाजिकेषु उत्पन्न: साक्षिभास्य अनिर्वचनीयशकुन्तलाविषयक: रत्यादि स्थायीभाव एव रस इति नाम भजते।

अयं रसः भावनारूपदोषस्य कार्यरूपोऽस्ति । दोषस्य नाशानन्तरम् अर्थात् प्रथम एवं द्वितीये मते च रसः नित्येति वदन्ति । अस्मिन् तृतीये मते तु आरोपद्वारा तेषां व्यवहाराणां सिद्ध्यर्थं प्रयत्नः न क्रियते । अस्य कारणम् अस्मिन् मते रसः स्वयम् उत्पत्तिविनाशशीलोऽस्ति । उक्तः दोषः एव रसोत्पादकोऽस्ति । दोषस्य नाशानन्तरं रसस्य नाशो भवति । अस्य अयमर्थः उक्त-दोषस्य प्रभावेन तदैव शकुन्तलादिरतेः प्रतीतिर्भवति । एवं यदि दोषस्य नाशो भवति तस्याः रतेरपि नाशो भवति ।

यद्यपि रसः वास्तवे सुखरूपो नास्ति । तथाऽप्यहं शकुन्तलाविषयकरतिमान् दुष्यन्तः इत्यादि प्रतीत्यनन्तरम् अलौकिकचमत्कारः भवति । उक्तरतिरूपे भेदो न ज्ञातः अर्थात् उभयोः मध्ये भेदः नास्ति, उभावपि अभिन्नावतः रसः सुखस्वरूप इति व्यवहारः प्रचलति । ईदृशः रसः वस्तुतः व्यङ्ग्यो न, न वर्णनयोग्योऽस्ति किन्तु रसस्योत्पत्तेः पूर्वं व्यञ्जनावृत्त्या शकुन्तलादिविषये दुष्यन्तादिरतिः ज्ञातो भवति, उक्तदोषेण अस्मासु भासितो अलीकरसरूपशकुन्तलादिरतेरभेदो न ज्ञातो भवति, अथवा वास्तविककल्पितरत्योः उभयोरैक्यतां स्वीकुर्मः । अतः अयं रसः व्यङ्ग्यः, वर्णनयोग्य इति च कथयेम।

दुष्यन्तादिनिष्ठशकुन्तलादिविषयकवास्तविकरतिमान् इत्यादि ज्ञानं वस्तुतोऽस्माकं व्यञ्जनाव्यापारेण एव भवति, अस्य वर्णनं कवयः काव्येषु कुर्वन्ति । अतः ते रत्यादयः वस्तुतः व्यङ्ग्याः वर्णनीयाः, अधुना कल्पितः रसरूपः रत्यादिः वस्तुतः व्यञ्जनाव्यापारेण न ज्ञातोऽपि कविः रत्यादीनां यदि वर्णनं न करोति, तथापि व्यङ्ग्य एवं वर्णनीयरतेः कल्पितरतेः अभिन्नतां वयं स्वीकुर्मः, अतः रत्यादिः व्यञ्जनावृत्त्या प्रकाशित एवं कविरस्य वर्णनमप्यकरोत् ।

यथा वयं सहृदयेषु शकुन्तलादिरतिः कल्पनामात्रप्रसूता, अतोऽनिर्वचनीयाऽस्ति, तथैव सहृदयानाम् आत्मनः आच्छादनं दुष्यन्तत्वमपि काल्पनिकम् एव भवति, अतः दुष्यन्तत्वमपि अनिर्वचनीयमेव । सामाजिकेषु शकुन्तलाविषयकरतिमानहम् इत्याकारकं रत्यादिविशिष्टं ज्ञानं विशेष्यतावच्छेदकं तदेव अवच्छादकत्वम् अर्थात् उक्तज्ञाने शतुन्तलाविषयकरतिः अहम् इति पदार्थे प्रकारणतया विशेषणरूपेण भासितः ।

अतः उक्त ज्ञाने विशेष्यः दुष्यन्तः वस्तुतः दुष्यन्तो न । अत एव अहं पदार्थे स्थितदुष्यन्तत्वं न आत्मनि भवेत्, अत एव सामाजिकः आत्मानं दुष्यन्तेति चिन्तयति, दुष्यन्तत्वमपि विशेष्यतावच्छेदकमस्ति तदवच्छेदकमेव आत्मानम् अवच्छादयति ।

विलक्षणभावनात्मकदोषप्रभावाद् अनिर्वचनीयत्वं न ज्ञायते सहृदयस्यात्मनि स्थिता शकुन्तलादिरतिर्न बाधिता न वा अचमत्कारी, द्वितीयमतत्वेन उपन्यस्ताः आक्षेपाः निरस्ताः ।

प्राचीनैः अभिनवगुप्तपादादिभिर्विभावादीनां साधारण्यं शकुन्तलादीनां कान्ता- त्वादि-सामान्यधर्मप्रकारकप्रतीतिविषयत्वमुक्तम् । तदपि प्रकृत्या शकुन्तलात्वादि विशेषधर्मप्रकारक-बोधजनकैः शकुन्तलादिशब्दैः काव्येन प्रतिपाद्यमानेषु शकुन्तलादिषु दोषविशेषकल्पनेन विना दुःखेनोपपादयितुं योग्यं यतोऽस्ति अतोऽस्मात् विभावादि- साधारण्यसम्पादकत्वाद्धेतोः, दोष - विशेषेऽवश्यकल्प्ये तेन दोषविशेषेणैव स्वात्मनि स्वधर्मिका दुष्यन्ताद्यभेदबुद्धिरपि दुष्यन्ता - भेदप्रकारकप्रतीतिरपि भवति ।

अस्तु दुष्यन्त इव सहृदयेऽपि सुखविशेषजनकत्वं, करुणरसादिषु शोकादेः दुःखजनकता प्रसिद्धा तर्हि कथं सहृदयाह्लादजनकत्वं भवति ? नायके यथा दुःखानुभवस्तथैव सहृदयेऽपि दुःख - जननमेव भवेदिति ।

लोके शोकादीनां दुःखजनकत्वं तु अनुभवसिद्धमेव, काव्ये काल्पनिकत्वात् कथं दुःखजनकत्वमिति चेत् न, यदि एवमङ्गीकुर्मः रज्जौ भ्रान्त्या भासितस्य सर्पस्यापि अवास्तविकत्वात् भयकम्पादिजनकता न सिद्ध्येत् काव्ये रतेरपि काल्पनिकत्वेन सुखजनकता न स्यादिति शङ्कापक्षः स्थेयानिति अस्माकं भावः ।

तत्तु सत्यमेव, किन्तु शृङ्गाररसप्रधानानि शाकुन्तलादीनि, करुणरसप्रधानानि उत्तररामचरितादीनि, एतेभ्यः काव्येभ्यः केवलम् आह्लाद एव जायते न तु दुःखम् । सहृदयानां हृदयमेव तत्र साक्षी । कार्यानुरोधेन कारणानि इति सिद्धान्तः लोकोत्तरव्यापारः अत्र मते दोषात्मा विलक्षणभावना ।

सुरतौ नखदशनाघातरूपविलक्षणव्यापारस्य सुखविशेषजनकत्वमेवास्ति, दुःखोत्पत्ति - प्रतिबन्धकत्वमपि प्रसिद्धमेव । अनया भावनया प्रतिबद्धं तत्र नोपपद्यते।

अथ यदि आह्लादवत् दुःखमपि प्रमाणसिद्धं तदा किमपि प्रतिबन्धकत्वं न कल्पनीयम्। स्वस्वकारणबलादुभयमपि भविष्यति । अत्र अयं प्रश्नः यदि काव्यं दुःखमेव जनयति तर्हि कवीनां कर्तुं सहृदयानां श्रोतुं प्रवृत्तिरेव न स्यात् । यदि अनिष्टं भवतीति जानीयुस्तदा प्रवृत्तिरेव न स्यादिति । घर्षणादिश्रमजन्यदुःखरूपस्य अनिष्टस्य अल्पत्वात्, सौरभशैत्यानुभवजन्यसुखरूपेष्टस्य बहुलत्वाच्च चन्दनलेपवत् सर्वेषां निर्विचिकित्सा प्रवृत्तिर्भवति । तथैवात्रापि दुःखापेक्षया सुखस्य बाहुल्यात् प्रवृत्तिः भवतीत्यभिप्रायः ।

**श्लोक :-**

**हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात् ।**

**शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ।**

**अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।**

**सुखं सञ्जायते तेभ्यो सर्वेऽभ्योऽपीति का क्षतिः ॥**

करुणरसादिषु काव्येषु तत्रापि सुखमेव जनयति तत्र किमपि प्रतिबन्धकं नास्ति । अश्रुपातादयोऽपि भगवद्दर्शनेन भवन्ति अतः तत्र दुःखानुभवः नास्ति तत्र सुखानुभव एवास्ति। सहृदयस्य पुत्रवियोगशोकवत् अहं दशरथः शोकादिप्रकारक-स्वात्मविशेष्यकप्रतीतेरिव यदि करुणादौ आह्लादः भवद्भिः स्वीक्रियते, तर्हि स्वप्नसन्निपातादावपि कदाचित् सहृदयानां तादृश्याः प्रतीतेः संभवात् तादृशस्थलेष्वपि आह्लादः स्वीक्रियताम्, पूर्वोक्ततादात्म्यारोपस्योभयत्र तुल्यत्वात् । एवं सति करुण- रसादावपि तादृशप्रतीतिः केवलदुःखोत्पत्तिरेव युक्तेति पूर्वपक्षिणामभिप्रायः ।

काव्यस्य व्यापारः व्यञ्जनावृत्तिः । लोके अस्माभिर्दृष्टाः दुःखजनकत्वेन प्रसिद्धाः त एव काव्ये समुपनिबद्धाः तदीयव्यञ्जनाव्यापारमहिम्ना अलौकिकीभूताऽलौकिकं सुखमेव जनयन्ति। न कदापि दुःखमिति सर्वानुभवसिद्धत्वात् करुणरसादौ तु न दुःखोत्पत्तिरित्युत्तरपक्षाशयः। इतरैः व्यापारैर्प्रमाणजन्यानुभवस्य अचमत्कारितया न कमनीयता। काव्यव्यापारजन्यास्वाद-रूपानुभवस्य अलौकिकतया चमत्कारित्वेन उभयोर्वैलक्षण्यम्।

जन्यत्वं च स्वजन्यभावनाजन्यरत्यादिविषयकत्वम् । स्वं काव्यव्यापारो व्यञ्जना, तज्जन्या या तद्व्यापारान्तररूपा भावना, तज्जन्यत्वे सति रत्यादि विषयकत्वम् आस्वादस्य काव्यव्यापारजन्यत्वमिति स्वीकारे रसास्वादस्य व्यञ्जना साक्षाज्जन्यत्व- विरहेऽपि तत्तमबाध - मित्यभिप्रायः ।

शकुन्तलादिविशेष्यकमगम्यत्वप्रकारकं रसविरोधिज्ञानं सहृदयस्य, दुष्यन्तोऽहं इत्याकारेण सर्वात्मविशेष्यकदुष्यन्ताभेदप्रकारकज्ञानेन प्रतिबद्धं नोत्पत्तुं तत्र शक्नुयादिति तृतीयं नव्यानां मतम्।

**चतुर्थं मतम्-** व्यञ्जनाव्यापारस्य दुष्यन्तादिनिष्ठशकुन्तलादिविषयकरतिग्राहकस्य साक्षिभास्यः रसः इत्यनुभवविषयीभूतानिर्वचनीयत्वस्य च तृतीयमते अङ्गीकृतस्यानभ्युपगमेऽनङ्गी- कारेऽपि तृतीयमते उक्तदोषस्य भावनाविशेषमहिम्ना प्रभावेणैव स्वात्मनि स्वात्मविशेष्यकः दुष्यन्तादि - तादात्म्यावगाही दुष्यन्ताद्यभेदविषयकः

शकुन्तलादिविषयकरत्यादिमदभेदः, शकुन्तलादिविषयकरत्यादिमदभेद – प्रकारको दुष्यन्तोऽहं शकुन्तलाविषयकरतिमान् इत्याकारके मनस्सन्निकर्षजन्मा, काव्यार्थस्य भावनया जन्म यस्य तादृशः विलक्षण– विषयताशाली लोकोत्तररत्यादिनिष्ठविषयता निरूपकः बोधः आस्वादः स एव रसः ।

स्वप्नादिः तु मानसादिज्ञानं भवति सोऽपि रसो वा इति पृष्ठे सति तत्र भावना पुनः पुनः अनुसन्धानात्मा नास्तीति कृत्वा स रसो न। यतो हि काव्यार्थानुसन्धानात्मा रसः एव तादृशं ज्ञानं जनयति एवम् आनन्ददायकोऽपि भवति । लौकिकप्रत्यक्षे कारणतया विषयस्य ज्ञानम् उपोद्यते, भ्रमे तु रज्ज्वासतोऽपि सर्पस्य यथा ज्ञानं भवति, सहृदयसमवेतरत्यादिप्रतीतेः दोषजन्यत्वाद् भ्रमत्वेन न वास्तविकविषय– सद्भावापेक्षेति ।

भ्रमरूपरसविषयीभूतरत्यादीनामास्वाद एव रसास्वादव्यवहारः, तत्रत्यरसपदस्य रत्यनुकूलरत्यादिपरत्वस्य विवक्षणात् । तुरीयमतावलम्बिभिः अहं शकुन्तलाविषयक– रतिमान् इति मानसो बोधः, तादृशः शकुन्तलाविषयकरतिमद्दुष्यन्तोऽहं इत्याकारक– द्वितीयो बोधः । दुष्यन्तः शकुन्तलाविषयकरतिमानहत् इत्याकारकरतिमांश्चाहम् इत्याकारकः तृतीयः भेदोऽपि स्वीक्रियते ।

त्रिविधोऽयं भेदः अस्मिन् मते रसपदार्थतया अभ्युपेयः । बेधत्रयेऽपि स्वात्मनि विशेषणीभूता रतिः तस्याः शब्दात् अप्रतीतिः भवति, वाचकशब्दात् अज्ञातत्वात् रतिबोधिकायाः व्यञ्जनायाः अस्मिन्मते अस्वीकारात् प्रथमम् नटादिव्यापारः एव कारणं यत्र तादृशं नटरूपो दुष्यन्तः शकुन्तलादिविषयकरतिमान् तद्विषयक– कटाक्षभुजाक्षेपादिचेष्टावत्वात् इत्याकारकम् अनुमानं विशेषणज्ञानार्थं रतिप्रत्ययनिमित्तम् अङ्गीकरणीयम्। अस्मिन् मते दुष्यन्तत्वेन ज्ञाते नटे चेष्टया शकुन्तलारतेरनुमानम् अन्तं तादृशदुष्यन्तेन सह आत्मनः तादात्म्यावगाहि प्रागुक्तं त्रिविधं मानसं ज्ञानमेव रस इति सारः ।

**भट्टलोल्लटमतम्-** साक्षात्सम्बन्धेन दुष्यन्तादौ अनुकार्ये स्थिता रतिरेव रसः इत्यभिधीयते । नाटके विभावादि सुन्दराभिनयप्रदर्शने निपुणः दुष्यन्तरूपनटः तस्मिन्नेव काव्ये पाठकानामुपयीरोपणं कृत्वा तेषाम् अनुभवं कुर्मः वयम् ।

अस्यमतानुसारं रसज्ञानस्य स्वरूपं, पूर्वमतवत् दुष्यन्तोऽयं शकुन्तलादि– विषयकरतिमान् इत्याद्युद्देश्यविधेयभावे भेददर्शनात् प्रकारत्रयमिति स्वीकुर्वन्ति । भट्टलोल्लटः मीसांसकः, अतः एतन्मतं एवमुल्लिखितम् – विभावैः जनितः, अनुभावैः प्रकाशितः, व्यभिचारिभावैश्च पोषितश्च शकुन्तलादिविषयको दुष्यन्तादौ

अनुकार्ये वास्तविकः अभिनयकौशलेन नटे चारोपितः सहृदयैः पश्चात् भावनारूप– दोषजन्यनटतादात्म्याध्यासादात्मनि साक्षात्क्रियमाणे रत्यादिः स्थायी रसः ।

**6.श्रीशङ्कुकमतम्**-दुष्यन्तोऽयं इति दुष्यन्तत्वमिति ज्ञातिविषयीकृते, अनुकर्तरि शैलूषे, सन्दिग्धवति क्रियया निर्वृत्तैः शिक्षाभ्यासादिमात्रविहितत्वात् अवास्तविकैरपि साम्यातिशयेन वास्तविकतया ज्ञातैः, विभावादिभिर्हेतुभूतैस्समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वेऽपि– विभिन्नविषये अनुमितिसामग्र्या एव नटविषयकप्रत्यक्षप्रतिबन्धनात् अनुमीयमानः दुष्यन्ताद्यनुकार्यगतः शकुन्तलादिविषयको रत्यादिरेव रसः ।

दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान् तद्विषयककटाक्षभुजविक्षेपचेष्टावत्त्वादिति अनुमित्याकारः । इद्रियसन्निकर्षेण नटविषयकप्रत्यक्षसामग्रीसद्भावेऽपि रत्यादिसाध्य– विषयकानुमितिसामगया विभिन्नविषयत्वेन इतरप्रतीतिप्रतिबन्धकत्वाद् रत्याद्यनुमितिरेव भवति, न तु नटस्य प्रत्यक्षम् । परोक्षज्ञानस्य अचमत्कारित्वं चात्र पक्षेऽरुचिबीजम् ।

**7. विभावादयस्त्रयः समुदिताः रसाः ।** केचन विद्वांसः विभावानुभावव्यभिचारिभावा एव रसाः रसनव्यापारयोगात्

आस्वाद्या: ।

**प्रतीयमान: प्रथमं प्रत्येकं हेतुरुच्यते ।**

**तत: सम्मिलित: सर्वो विभावादि: सचेतसाम् ।**

**प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् ॥**

विभावादीनां परस्परसम्मेलनेन प्रपाणकरस इव काव्यरस: कोऽपि निष्पद्यत
इत्याशय: ।

**8. त्रिषु य एव चमत्कारी, स एव रस: ।** अन्यथा तु त्रयोऽपि न केचन विद्वांस: एवं कथयन्ति विभावानुभाव- व्यभिचारिभावेषु य: चमत्कारं जनयति स एव रस:, यदि कोऽपि चमत्कारं न जनयति तर्हि त्रयोऽपि रसाभिधां न वहन्ति । यतो हि लोकोत्तरचमत्कार एव काव्यस्य प्राण इति वयं जानीम: ।

**9. भाव्यमान: विभाव एव रस: ।** भाव्यमान विभाव एव रस इति केचित् वदन्ति । भाव्यमान: पुन:पुन: अनुसन्धानरूपभावनाविषयीक्रियमाणो विभाव आलम्बनोद्दीपनात्मक एव न तु अनुभवव्यभिचारिणावपि रस इत्यन्ये वदन्तीत्यर्थ: ।

**10. अनुभावस्तथा इतीतिरे ।** संस्कृतविमर्श: अनुभाव: स्थायी कार्यरूपस्तथा भाव्यमानो रस इतीतरे वदन्ति । भावनाया: प्रभावेण कारणापेक्षया कार्यस्य विच्छित्तिविशेषाधायकत्वेन च अनुभावस्यैव रसत्वं मन्तव्यमित्यर्थ: ।

**11. व्यभिचार्येव तथा तथा परिणमति इति केचित् ॥** भावनाविशेषविषयीक्रियमाणो व्यभिचारी भाव एव तथा रसरूपतया परिणमतीत्यन्ये वदन्ति ।

टिप्पणी- आचार्य भरतस्य विभावेत्यादिसूत्रं तत्तन्मतपरतया रसगङ्गाधरकारेण स्वकीये ग्रन्थे प्रतिपादितम्। एतेषां मतानां ज्ञानेन अवलोकनेन इदं ज्ञायते यत् नवरसेषु सारस्तु चमत्कार एव केवलं मतवैविध्यं तु दृश्यते किन्तु तत्र चमत्कारस्य अस्तित्वं केनापि न तिरस्कृतम् अत: रसे सारश्चमत्कार: इति वाक्यं सुप्रसिद्धम् जातमिति ममाभिप्राय: ।

**सन्दर्भसूची -**

1. रसगङ्गाधर:- जगन्नाथपण्डितराय: - (प्रथमाननम् - चन्द्रिका व्याख्यया सहित:- व्याख्याता - बदरीनाथ झा महोदया:) वाराणसी, 1998

2. काव्यचमत्कार: - श्री रामप्रताप: (काश्मीर विश्वविद्यालयद्वारा मुद्रित: )
हाइब्रो पब्लिकेशन्स्, जम्मू, 2012

3. श्वोताश्वरोपनिषद् - चौखम्बा वाराणसी संस्था द्वारा प्रकाशितम्, 1986